# द्वितीयोऽध्यायः
# योगपरिचयात्मकः

# द्वितीयोऽध्यायः (योगपरिचयात्मकः)

1.योगशब्दस्य अर्थः पर्यायः भेदाश्च ।

2.विविधयोगानां स्वरूपाणि ।

3.होराशास्त्रोक्तयोगाः तन्नामानि च ।

4.योगानां ग्रहयुतिदृष्ट्या अन्यदृष्ट्या च अध्ययनम् ।

5.विशिष्टयोगानामध्ययनम् ।

## 1.योगशब्दस्य अर्थः पर्यायः भेदाश्च

**योगशब्दस्य अर्थः, –**

संस्कृतभाषायां योगशब्दस्य प्रयोगः अतीवव्यापकार्थे प्रयुक्तः भवति। तत्र युजिर् योगे धातोः घञ् प्रत्यय कृत्वा योगशब्दस्य व्युत्पत्तिः भवति।

'युजिर योगे' धात्वर्थे 'कर्तरि घञ' प्रत्यय प्रयोगे योगशब्दस्य व्युत्पत्तिः भवति।

योगशब्दस्य प्रयोगः धर्मशास्त्र, ज्योतिषशास्त्र, दर्शनशास्त्र, उपनिषदोपुराणानि विभिन्नग्रन्थेषु भिन्न–भिन्न सन्दर्भेषु कृतमस्ति। यथा –

1. **पातञ्जल योगदर्शनानुसारेण**–समत्वं योगः उच्यते। योगश्चित्तवृत्त निषेधः[1] ।अर्थात् चित्तवृत्तीनां निरोधः एव योग अस्ति।
2. **सांख्यदर्शनानुसारेण** – पुरुषप्रकृत्योवियोगोपि योगइत्यभिधीयते।[2]
3. **विष्णुपुराणानुसारेण**– योगः संयोगः इत्युक्तः जीवात्मा परमात्मने ।[3] अर्थात् जीवात्मा–परमात्मायाः पूर्णरूपेण मेलनं अर्थात् योगः।
4. **भगवद्गीतानुसारेण**– सिद्धासिद्धयो समोभूत्वा समत्वं योग उच्यते।[4] अर्थात् सुख–दुख, हानि–लाभ, शत्रु–मित्र इत्यादयः द्वन्द्वेऽपि समभाव नाम योगः भवति।

---

1. पातञ्जल योगदर्शन– स.पाद –2
2. सांख्यदर्शन
3. विष्णुपुराण
4. श्रीमद्भगवतगीता– 2/48

तथा च

5. तस्माद्दयोगाययुज्यस्व योगः कर्मसु कौशलम् ।[1] अर्थात् निष्काम भावना एव योगः अस्ति।

6. **बौद्धधर्मानुसारेण**—कुशल चित्तैकाग्रता योगः।[2] अर्थात् कुशलतायाः चित्तस्य एकाग्रता एव योगः भवति।

7. **कठोपनिषदि**— योगमिति मन्यते स्थिरातिन्द्रयाधारणम्।[3] अत्र योगशब्दः कर्मवाची,ध्यानवाची, ज्ञानवाची वर्तते।

8. संस्कृत वाङ्गमये योगशब्दस्य प्रयोगः बाहुल्येनप्राप्यते। यथा—**मनुस्मृतौ—**

योगसाधनविक्रीतं योगदानं प्रतिग्रहम्।

यत्र वाऽप्युपधि पश्येत्सर्वं विनिवर्तयेत।।[4]

9. अत्र योग शब्दस्य छलवाचीरूपेण प्रयोगो जातः। अतः योगशब्दस्य अपरो अर्थः छलापि भवति। योगशब्दस्य प्रयोगः दर्शने एवं उपनिषद् ग्रन्थेऽपि प्राप्तं भवति। तद्यथा ——

योगश्चित्तवृत्तिनिरोधः।[5]

---

1. श्रीमद्भगवतगीता— 2/50
2. बौद्धधर्म
3. कठोपनिषद्— तृतीय वल्ली — 2211
4. मनुस्मृतिः— 8/165
5. पातञ्जलयोगदर्शनम्

10. पाशुपतदर्शने योगशब्दः चित्तं एवं ईश्वरसम्बन्धार्थे ग्रहीतम्।
चित्तद्वारेणेश्वरसंम्बन्ध हि तु योगः। [1]

संस्कृतभाषायां विविध उपसर्गपूर्वकेन योगशब्दस्य विविधार्थाः निष्पद्यन्ते। तद्यथा –

प्र+योगः = प्रयोगः
उप+योगः = उपयोगः
सम्+योगः = संयोगः
वि + योगः = वियोगः
सह+योगः = सहयोगः
सु+योगः = सुयोगः

**ज्योतिषशास्त्रानुसारेण योगः –**

ज्योतिषशास्त्रे योग इति ग्रहाणां विशिष्टस्थितिः संयोगम्।

ग्रहाणां स्थितिः भेदेन पूषन् योजयन्ति हि ।
फलैः कर्मसमुद्भूतैरिति योगाः प्रकीर्तिताः।। [2]

भिन्न–भिन्न कालेषु खगोले सूर्यादिग्रहाणां प्रतिदिनं बल–राशि–काल–दिक्–युति–स्थितिभेदेन अन्यग्रहाणांप्रति नक्षत्र–प्रतितात्कालिक सम्बन्धपूर्वकेन या विशिष्टा परिस्थितिः उत्पद्यते सा ज्योतिषशास्त्रे 'योगः' शब्दने ज्ञायते।

**योगानां भेदाश्च –**

तत्र मुर्हूत सन्दर्भे नक्षत्र–तिथि–वार–करण–विषम्भयोगादि सिथत्यानुसारेण रवियोगः –अमृतसिद्धियोगः –गुरुपुष्ययोगः –रवियोगः

---

1. श्रीमद्भगवतगीता
2 श्रीमद्भगवतगीता

–गुरुपुष्यादियोगः–आनन्दादियोगाः इत्यादि समभाव्यते। तथा च मनुष्यजीवने तेषां शुभाशुभ फलं प्राप्यते। तेनैव मुहूर्ताधारेण कार्याणां सिद्धिः–असिद्धिः भवति।

**होरासन्दर्भे पञ्चमहापुरुषुयोगः –**

नाभसादियोगः–अधियोगः – वेशियोगः –केमद्रुमयोगः – राजयोगः –बालारिष्टयोगादि तत्र भिन्न–भिन्न योगानुसारेण जन्मपत्रिकायां ग्रहस्थित्यानुसारेण जातकः जीवनपर्यन्तं शुभाशुभं फलं प्राप्यते। यथोक्तं **लघुजातके ––**

यदुपर्चितमन्यजन्मनि शुभाशुभं तस्य कर्मणां पङ्क्तम्।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।।[1]

ज्योतिषशास्त्रे ग्रह –नक्षत्र –तिथि –वार –अयन परत्वे दूहादि द्वादशभावेषु जन्मपत्रिकायां सूर्यादिग्रहमध्ये परस्परं सम्बन्धानुसारेण विविधयोगाः उतपद्यन्ते।

तत्र ग्रह एवं भाव–राशि मध्ये चत्वारि प्रकारैः भिन्न–भिन्न सम्बन्धस्थितयः भवितुं शक्यते। तद्यथा –

प्रथम स्थानसम्बन्धो दृष्टिजस्तु द्वितीयकः।
तृतीयस्त्वेकतो दृष्टिः स्थितयकेत्र चतुर्थकः।।[2]

**ज्योतिषे विविधयोगस्वरूपं, प्रकारञ्च :–––**

ज्योतिषशास्त्रे अनेके योगाः सन्ति। परन्तु अत्र योगस्यव्युत्पत्तिः, योगशब्दस्यार्थः योगशब्दस्य लक्षणमादीनाम् विवेचनम् अधोलिखितमस्ति।

**योगशब्दस्य व्युत्पत्तिः –––**

युजिरयोगे धातोः घञ् प्रत्यय भूत्वा योगः शब्दः निष्पन्नो भवति।

---

1. **लघुजातके – 1/3**
2. बृहत्होराशास्त्र–20/11

**ज्योतिषे विविधयोगस्वरूपं, प्रकारञ्च :———**

ज्योतिषशास्त्रे अनेके योगाः सन्ति। परन्तु अत्र योगस्यव्युत्पत्तिः, योगशब्दस्यार्थः योगशब्दस्य लक्षणमादीनाम् विवेचनम् अधोलिखितमस्ति।

**योगशब्दस्य व्युत्पत्तिः ———**

युजिरयोगे धातोः घञ् प्रत्यय भूत्वा योगः शब्दः निष्पन्नो भवति।

**योगशब्दस्य लक्षणम् ——**

ज्योतिषे विविधानि योगानि सन्ति, परन्तु मम विषयः **"ज्योतिषशास्त्रोक्त—राजयोगानांविश्लेषणात्मकमध्ययनम "** अस्ति। अतः योगलक्षणमपि ज्योतिष शास्त्रानुसारं प्रस्तौमि मया। ग्रहस्थिति अनुसारं जातकानां फलं प्राप्त

भवति सः योगः कथ्यते। ज्योतिषसिद्धान्तानुसारं योगस्य महत्वमधिकं विद्यते। सूर्यादिनवग्रहाः जातकानां शरीरे, अंग धात्वादि दोषानां प्रतिनिधित्वं कुर्वन्ति। योगलक्षणमनुदृश्य प्रश्नमार्गः नामकः ग्रन्थे योगशब्दस्य लक्षणम—कथितमस्ति। तद्यथा ——

ग्रहाणांसिीति भेदेन पुरुषान् यांजयन्ति हि।

फलैः कर्मसमुद्भूतैरिति योगाः प्रकीर्तिताः।।[1]

**ज्योतिषशास्त्रानुसारेण योगः ——**

ज्योतिषशास्त्रं विविधविषयपरकं शास्त्रमस्ति। ग्रहाणां कालावस्थागत्यादि निदर्शनं, कर्मसम्पादनिमित्तकमुहूर्तादिकथनेन शुभाशुभफलं कथनमस्यशास्त्रस्य मुख्याशयोः वर्तते। ज्योतिषशास्त्रे सहस्राधिका योगाः सन्तीति— अनुमीयते च।

ग्रहयोगं ज्योतिषशास्त्रस्य भाषायां ''योगः:'' कथ्यते। मुख्यरूपेण ग्रह–राशि भावस्याधारोपरि विविधप्रकारकाः भेदसंयुक्ते योगाः विविधप्रकारकाः भवन्ति।

यथा––

1. ग्रहजनितयोगः
2. राशिजनितयोगः
3. भावजनितयोगः
4. राशि–भाव–ग्रहजनितयोगः
5. भाव–ग्रहजनितयोगः।

**विशिष्ट योगानां नामानि :–––**

ज्योतिषे अनेके योगाः सन्ति। परन्तु अत्र ये ये प्रमुखाः योगाः सन्ति तेषांनामान्येव प्रस्तूयते मया तद्यथा ––

| **क्रम** | **योगनामानि** |
|---|---|
| 1 | रुचकयोगः |
| 2 | इन्द्रयोगः |
| 3 | हंसयोगः |
| 4 | भद्रयोगः |
| 5 | अनफायोगः |
| 6 | भास्करयोगः |
| 7 | दुर्धरायोगः |
| 8 | मरुतयोगः |
| 9 | सुनफायोगः |
| 10 | धुरन्धरायोगः |

---

**1.** प्रश्नमार्गः – 9／48

| | |
|---|---|
| 11 | गजकेसरीयोगः |
| 12 | पर्वतयोगः |
| 13 | मालिकायोगः |
| 14 | सार्वभौमराजयोगः |
| 15 | महाराजधिरायोगः |
| 16 | सिंहासनयोगः |
| 17 | चतुश्चक्रयोगः |
| 18 | एकावलीयोगः |
| 19 | कुबेरतुल्यराजयोगः |
| 20 | कुबेरतुल्यराजयोगः |
| 21 | श्रीछत्रयोगः |
| 22 | शत्रुजितराजयोगः |
| 23 | फणियोगः |
| 24 | नारीराजयोगः |
| 25 | पञ्चमहापुरुषयोगः |
| 26 | राजराजेश्वरयोगः |
| 27 | प्रशान्तराजयोगः |
| 28 | पुष्कलराजयोगः |
| 29 | भेरीयोगः |
| 30 | श्रीनाथयोगः |

| | |
|---|---|
| 31 | लक्ष्मीयोगः |
| 32 | चण्डिकायोगः |
| 33 | मुकुटयोगः |
| 34 | देवेन्द्रयोगः |

ज्योतिषशास्त्रे योग इति ग्रहाणां विशिष्टस्थितिः सयोगम् इति।

ग्रहाणां स्थितिः भेदेन पूषन् योजयन्ति हि।
फलैः कर्मसमुद्भूतैरिति योगाः प्रकीर्तितः।।

भिन्न–भिन्न कालेषु खगोले सूर्यादिग्रहाणां प्रतिदिनं बल–राशि–काल–दिक्–युति –स्थितिभेदेन अन्यग्रहाणां प्रति, नक्षत्रप्रति तात्कालिक सम्बन्धपूर्वकेन या विशिष्टा भावपरिस्थितिः उत्पद्यते सा ज्योतिषशास्त्रे 'योगः' शब्देन ज्ञायते।

तत्र मुर्हूत सन्दर्भे नक्षत्र –तिथि –वार –करण विष्कुम्भादि योगाः स्थित्यानुसारेण रवियोग –अमृतसिद्धियोग –गुरुपुष्याामृतियोगः –आन्नदादि–योगः सम्भाव्यते। तथा च मनुष्यजीवने तेषां शुभाशुभ फलं प्राप्यते।

होरा–सन्दर्भे पञ्चमहापुरुषयोग –नाभसयोग–अधियोग –वेशिवशियोग –केमद्रुमयोगः –राजयोग –बालारिष्टयोगादि तत्र भिन्न–भिन्न योगानुसारेण जन्मपत्रिकायां ग्रहस्थित्यानुसारेण जातकः जीवनपर्यन्तं शुभाशुभ फलं प्राप्यते। यथोक्तं लघुजातके –

यदुपर्चितमन्ष्जन्मनि शुभाशुभ तस्य कर्मणां पङ्क्तिम्।
व्यज्जयति शास्त्रमेतत तमसि द्रव्याणि दीप इवं [1]

---

1. लघुजातके

## 2.विविधयोगानां स्वरूपाणि

ज्योतिषशास्त्रोक्तयोगाः सूर्यादिग्रहाणां मेषादिद्वादशराशीसु तथा च लग्नादिद्वादशभावाः परस्परं भिन्न–भिन्न सम्बन्धानुसारेण उत्पद्यन्ते। केचन् योगाः केवलं सूर्यादि सप्तग्रहाणां युति–दृष्टिः–परिवर्तनकारणेन उत्पद्यन्ते। केचन सूर्यादिग्रहाः एवं मेषादि राशिसम्बन्धकारणेन सम्भाव्यते। केचन योगाः ग्रहासणां भावस्थित्याधारेण उत्पद्यन्ते। ज्योतिषशास्त्रे मुख्यत्वे षड्प्रकारकाः योगाः भवन्ति। तद्यथा –

1. सूर्यादिग्रहजनितयोगाः।
2. ग्रह–राशिजनितयोगाः।
3. ग्रह–भावजनितयोगाः।
4. षोडशवर्गे ग्रहजनितयोगाः।
5. राशि–ग्रह–भावजनितयोगाः।
6. नक्षत्र–तिथि–वारसंयोगजनितयोगाः।

यथा प्रश्नमार्गे –

स्थानतो भावतः खेटैः स्थानभावनभश्चरैः।
स्थानभावसमायोगाद् भावखेचरयोगतः।।
योगाः स्युः षड्विधाः स्थानखेचराभ्यां तु सप्तमः।।[1]

### <u>1.सूर्यादिग्रहजनितयोगाः –</u>

सूर्यादि सप्तग्रहाणां तथा राहुकेतोः जन्मपत्रिकायां स्थित्यानुसारेण जनितयोगान् कथ्यते। षड्बल युक्ता सूर्यादीनां शुभाशुभत्वं राशिस्वामित्वं –भावकारकत्वं स्थानस्वामित्वं अन्यग्रहसह युति वा दृष्ट्याधारेण भवितानां योगान् ग्रहजनितयोगाः कथिता। यथा –

गुरुबुध शुक्राः सौम्याः सौरिकुजाकास्तु निगदिताः पापाः।

---

1. प्रश्नमार्गः –2/49–50

**शुभाशुभग्रहाः –**

गुरु–शुक्र–पूर्णचन्द्रः तथा शुभयुक्तबुधः शुभग्रहाः तथा सूर्य–भौम–मन्दः –राहुः तथा केतुः एवं क्षीणचन्द्रः ताि पापयुक्तबुधः पापग्रहाः कथ्यते। पापग्रहः अपि लग्नेशः वा त्रिकोणाधिपतिः केन्द्राधिपतिः अस्ति चेत् तदा शुभफलं ददाति। तथा शुभग्रहः अपि यदि दुःस्थानं त्रिषडाय स्थानस्य स्वामी चेति तर्हि अशुभ फलं ददाति। यथोक्तंपराशरेण –

सर्वे त्रिकोणेनतारो ग्रहाः शुभफलप्रदाः।
पतयस्त्रिषडानां यदि पापफलप्रदाः।।[1]

न दिशन्ति शुभं नृणां सौम्याः केन्द्राधिपाः।
यदि क्रूराश्चेदशुभं ह्येते प्रबलाश्चोत्तरोत्तरम्।।[2]

श्लोकेऽस्मिन् श्रीपराशरमतेन शुभग्रहाः यदि केन्द्राधिपाः भवन्ति चेत् तदा जातकाय शुभाफलं न ददाति अपितु अशुभग्रहाः केन्द्राधिपाः सन्ति चेत् तदाऽपि अशुभफलं न भवति। राहुकेतौः द्वौ पापग्रहौ जातकाय अशुभफलं प्रयच्छति, किन्तु यदि तौ तयोग्रहौ केनापि अन्य ग्रहेभ्यः सह संयुतौ स्तः तर्हि तस्यग्रहस्य भावफलं प्रदिशेताम्। यथा कथितं लघपाराशर्याम् –

यद्यभ्दावगतौ वाऽपि यद्यद्भावेश संयुतौ।
तत्तत्फलानि प्रबलौ प्रदिशेतां तमोग्रहौ।।[3]

यदि सूर्यादि ग्रहाः शुभफलप्रदा भूत्वा युतिं वा दृष्टि सम्बन्धः परस्परं क्रियते तदा ग्रहजनित योगान् कथ्यते। यथा –

---

1. लघुपाराशरी – 2/3
2. लघुपाराशरी – 2/4
3. लघुपाराशरी – 2/10

**दृष्टिकृतयोगः –**

दिवौकसां यतेर्मन्त्री कुर्यात्प्रश्न बुधं नरम्।
शिरोभिः शासनं तस्य धारयन्ति नृपाः सदा।।[1]

अर्थात् जन्मकाले यदा बुधः गुरुणा दृष्टो चेत् तर्हि तस्य जातकस्य आदेशाः नृपाः सदा शिरोधार्यते। गुरोः शुभदृष्टिकारणेन बुधस्य शुभा एवं बुद्धिमता वर्धते। शुभदृष्टिकारणेन जातकोऽयं अतीव मधावीख प्रतिभावान्, धैर्यवान् भवेत् तस्य प्रतिीाा कारणेन सः लोकपूज्यः नृपपूज्यः अपि भवेत।

सूर्यादि सर्वे ग्रहाः स्वस्थितितः सप्तमे भावे पूर्णदृष्ट्या पश्यन्ति। तथा च गुरु विशेषेण सवस्यपरितः पञ्चमे तथा नवमभावे अपि पूर्णदृष्टिः क्रियते। शनिः स्वस्थितितः तृतीय दशमेभावे विशिष्ट पूर्णदृष्टिः क्रियते। भौमः स्वस्थितिः चतुर्थे, अष्टमेभावे विशिष्टा पूर्णदृष्टिः क्रियते।

**दिग्बलीग्रहकृतराजयोगः –**

द्वौ वा त्र्याद्या दिग्बलयुक्ता यदि जातः।
क्षमाभृदंशे भूमिपतिः स्याज्जयशीलः।
हित्वा मन्दं पञ्चखगा दिग्बलायुक्ता
श्चत्वारो वा भूपतिरन्यावयजोऽपि।।[2]

अर्थात् द्वौ वा त्रयाधिकग्रहाः दिग्बली भूत्वा कुण्डल्यां चेत् तर्हि राजवंशे जातः मनुष्यः नृपः विजयी भवति। शनिः विहाय चत्वारः ग्रहः दिग्बली भवन्ति तर्हि सः जातकः साधारणकुलोत्पन्नोऽपि नृपः भवति।

**वक्रीग्रहजनितयोगः –**

यद्येकोऽपि विराजितांशुनिकरः सुस्थानगो वक्रगो–
नीचस्थोऽपि करोति भूपसदृशंद्वौ वा त्रयो वा ग्रहाः।।[3]

---

1. होरारत्नम् – 5/159
2. फलदीपिका – 7/4
3. फलदीपिका –7/3

यदि एकोऽपि ग्रहाः नीचराशिस्थः भूत्वाऽपि 6–8–12 भावविहाय सुस्थानेषु वक्री भेवत् तर्हि सः जातकः भूपसदृशं समर्थः भवेत्।

**युति–दृष्टिकृतः योगः –**

चन्दाद्वविक्रमणः कुजोऽयनिसुतादस्ते शनिः सूर्यजा –
दस्ते दैत्यगुरुः सितान्मदनगो जीचो यदीन्द्राहृवयः।
ख्यातेस्तत्र भवतः सुशीगुणवान् भूपोऽथवा तत्समो
वाग्मी चित्तचिचित्रभूषणयशोरूपप्रतापान्वितः।।[1]

अर्थात् चन्द्रातः तृतीये भौमः एव शुक्रः स्थितौ रतः तेभ्यः सप्तमे चन्द्रतः नवमे बृहस्पतिः एवं शनि स्तौ तर्हि इन्द्रयोगः समुत्पद्यन्ते।

अत्र कुण्डल्यां कोऽपि लग्ने राशीसु ग्रहाः स्थिताः सन्ति चेत् योागोऽयं केवल ग्रहाणां युति–प्रतियुत्याधारेण एवं समुत्पद्यते।

**द्वि–त्रि–चतुर–पञ्च–षड्ग्रहजनितयोगाः –**

कल्याणवर्मणः रचितः स्वकीये सारावलीग्रन्थे पञ्चमदशतमो अध्याये द्विग्रहयोगाध्याये सूर्यादिसप्तग्रहाणां परस्परं द्विग्रहयुतिः कारणेन भवितानां एकविंशति योगानां वर्णनमस्ति। कथितं यत् –

यवनाचार्यैर्वृद्धैर्द्विग्रहयोगेषु यतफलं प्रोक्तम्।
तदहमपहाय मत्सरमधुना वक्ष्ये विशेषेण।।[2]

तत्र पञ्चदशतः एकोनविंशतितमे अध्यायोषु क्रमेण द्विग्रहयोः तः षड्ग्रहाणां युतिकारणेन भवितानां योगफलानि वर्णितानि सन्ति। तत् सर्वं वृद्धयवनाचार्यैः कथिता।

**सूर्यादिचन्द्रयुतिजनितयोगः –**

युवतीनां वशगः स्यादविनीतः कूटवित्पृथुलवितः।
आसवविक्रयकुशलो ख्युडुपत्योः क्रियानिपुणः।।[3]

---

1. जातकपारिजात –7/68
2. सारावली– 15/1 3.सारावली – 15/2

रविचन्द्रयोः युतिः अस्ति चेत् तर्हि जातकः युवतीनां वशगः अविनीतः उदण्डः: धनवान् महाविक्रयकुशलः तथा क्रियानिपुणः भवति।

**षड्ग्रहयुतिजनितयोगः –**

विद्याधनधर्मरतः क्षामो बहुभाषको विकृष्टमतिः।
एकभवनोपयातैर्बुधन्देव्यापारगुरुशुक्रैः ।।[1]

सूर्यचन्द्रभौमबुधगुरुशुक्रग्रहाणां युतियोगे जातः नरः वि?ावान, धनी, धर्मरथः, बहुभाषकः, उतकृष्टः बुद्धिमान् भवति।

**2.मेषादिराशि एवं ग्रहसंयोगजनितयोगाः –**

मेषादिद्वादशराशीसु सूर्यादिग्रहाणां स्वोच्यादि –नीच्यादि राशि स्थित्यानुसारेण भवितानां योागनां स्वरेयोऽयम् वर्णिता षोडशवर्गेषु ग्रहाणां स्व–उच्च–नीच स्थित्यानुसारेण ग्रहस्य बलाबल निर्धारितं भवति, अत्र तु तेषां पारिजातादि संज्ञा प्रवर्तते। यथा ग्रह षोडशवर्गे, षड्वर्गे, स्व उच्च अस्ति चेत् तदा तस्य पारावतांश संज्ञा कथ्यते। तथा च येन कारणेन संज्ञाविशेष राजयोगः समुपद्यन्ते इति। अत्र ग्रहाणां मैत्री अपि वचािरणीयाः भवन्ति।

**सूर्यादीनां मित्र–शत्रु समग्रहः –**

सूर्यादि सप्तग्रहेषु परस्परं नैसर्गिकमैत्री एवं इष्टकालिव तात्कालिकमैत्रीसम्बन्धः भवति। तेनाधारेण पञ्चधामैत्री अपि निर्धायते।

**नैसर्गिकमैत्री –**

कोऽपि ग्रहस्य मूलत्रिकोणराशितः प्रथमः, सप्तमः एवं उपचयभावानां आधिपतिग्रहाः नैसर्गिकशत्रवः भवन्ति। तत्र तस्य ग्रहस्य उच्चसाीनात् शत्रुः न गण्यते। अन्यस्थानानां अधिपतयः तस्य ग्रहस्य नैसर्गिक मित्राणि भवन्ति। यथोक्तं बृहत्शर होराशास्त्रे –

---

1. सारावली – 19/1

त्रिकोणात् स्वात्सुखस्वाऽन्त्यधोधर्मायुः स्वतुङ्गपाः।
सुहृदो रिपवश्चान्ये समाश्चोभयः लक्षणाः।।[1]

**तात्कालिक मैत्री –**

जन्मकुण्डल्यां तथा प्रश्नकुण्डल्यां वा सूर्यादि ग्रहेभ्यः प्रथमे एवं पञ्चमतः नवमभावेषु स्थितग्रहाः तात्कालिक कुण्डल्यां शत्रवः भवति। तदन्यत्र भावेषु स्थितग्रहाः तात्कालिक मित्राणि भवन्ति। यथा –

दशबन्धतवाय सहज स्वान्त्यस्थास्ते परस्परा।
तत्काले मित्रंतां यान्ति रिपवोऽन्यत्र संस्थिताः।।[2]

**पञ्चधामैत्री –**

पञ्चधामैत्री तु नैसर्गिकमैत्री एवं तात्कालिक मैत्र्याधारेण निर्धायते। यथा सूर्यादिसप्तग्रहाः –

1. नैसर्गिकमित्रः + तात्कालिकमित्रः = अतिमित्रः
2. नैसर्गिक समः + तात्कालिकमित्रः = मित्रः
3. नैसर्गिक शत्रुः + तात्कालिकमित्रः = सम
4. नैसर्गिक समः + तात्कालिकशत्रुः = शत्रुः
5. नैसर्गिक शत्रुः + तात्कालिकशत्रुः = अतिशत्रुः

---

1. बृहत्पाराशरहोराशास्त्र – 3/56
2. बृहत्पाराशरहोराशास्त्र – 3/61

**3.द्वादशभाव एवं ग्रहजनित योगाः –**

सूर्यादि ग्रहाणां परस्पर निश्चित भावस्थित्यानुसारेण भवितानां प्रकारोऽयम्। अत्र तु वेशि–वशि उभयचारी सूर्यतः द्वितीय–द्वादशभावगत ग्रहानुसारेण 180 प्रकारस्य योगाः सम्भाव्यन्ते। तथा च सुनफा, अनफा, दुर्धरायोगाः चन्द्रतः द्वितीय भावगत ग्रहानुसारेण भवन्ति।

एवं सूर्य–चन्द्र लग्नतः 6, 7, 8 स्थानेषु ग्रह स्थित्यानुसारेण सप्तप्रकारकाः आधियोगाः भवन्ति।

**4.षोड्शवर्गादि स्थानजनितयोगाः –**

श्री पराशरेनोक्त बृहत्पाराशर होराशास्त्रे ग्रहाणां षोडशवर्गस्थित्यानु–सारेणयोगस्य विवेचनं कृतमस्ति।

**5.राशिग्रहभावजनितयोगाः –**

अत्र सूर्यादिग्रहाणां मेषादिद्वादशराशिपूर्वकं देहादि द्वादशभावेषु भिन्न–भिन्न स्थित्यानुसारेण भवितानां योगानां प्रकारोऽयम्।

अत्र तु होराशास्त्रे महत्तमयोगाः वर्णिताः। तत्र भौमादि पञ्चग्रहजनिता पञ्चमहापुरुषयोगाः अरिष्टयोागाः महायोगाः दैन्ययोगाः, राजयोगाः, सैन्ययोगाः इत्यादि विशिष्टयोगानां प्रकारोऽयम्।

**6.नक्षत्र–तिथि–वार संयोगजनितयोगाः –**

मुहूर्तचिन्तामणेः मुर्हूतविभागे वर्णिताः आनन्दादियोगाः, विष्कुम्भादियोगाः, सिद्ध–अमृतसिद्धयोगाः, सूर्यादि शुभयोगाः तथा च खप्पर–गुलिकादि द्रेष्कणदियोगाः अपि तत्र वर्णिताः सन्ति।[1]

---

1. बृहत्पाराशर होराशास्त्र

# 3. होराशास्त्रोक्तयोगाः तन्नामानि च

ज्योतिषशास्त्रस्य फलितग्रन्थेषु यस्य नाम सर्वप्रथमं वर्तते, सः तु बृहत्तहोराशास्त्रमेव अस्ति।अस्मिन् ग्रन्थे हि पराशरमैत्रेय संवादरूपः कालान्तरे फलितशास्त्रस्य प्रसिद्धः ग्रन्थो विद्यते। अस्मिन् ग्रन्थे अष्टनवपरिमिताः अध्यायाः सन्ति। यथा –

ग्रन्थेऽस्मिन् पृथगध्यायैर्विण्या विनिवेदिता।
सृष्टिकमोऽवतारश्च गुणा खेटस्य भस्य च।।
विशेषलग्नं वर्गाश्च तद्विवेकाश्च राशि दृक्।
अरिष्टं तद्विभङ्गश्च विवेको भावजस्तथा।।
भावानाञ्च फलाध्यायो भावोरोत्थ फलं तथा।
अप्रकाशफलं स्पष्टखेटदृष्टिप्रसाधनम्।।
ततः स्पष्टबलाध्यायः इष्टकष्टप्रसाधनम्।
पदं चोपपदं तद्वर्गला त्वथ कारकाः।।[1]

ग्रन्थेऽस्मिन् संज्ञाध्यायः, योगाध्यायः, आयुविचारः, दशाफलाध्यायः, मिश्रकाध्यायश्चेति पञ्चध्यायाः सन्ति।

होराशास्त्रे विभिन्नयोगाः वर्णितानि सन्ति। तन्नामानि ईदृशी अस्ति। तद्यथा –

| क्रमः | विभिन्नयोगस्य नामानि |
|---|---|
| 1 | राजयोगाः |
| 2 | नाभसयोगाः |
| 3 | अरिष्टयोगाः |
| 4 | हीनकारयोगाः |

---

1. बृ.हो. – 98 / 10–13

| | |
|---|---|
| 5 | सन्यासयोगाः |
| 6 | दरिद्रयोगाः |
| 7 | मुहूर्तविषयकयोगाः |
| 8 | आनन्दादियोगाः |
| 9 | विष्कुम्भादियोगाः |
| 10 | उद्दाहयोगाः |
| 11 | पञ्चमहापुरुषयोगाः |
| 12 | वेशि–वशि–उभयचारीयोगाः |
| 13 | सुनफा–अनफा–दुर्धरायोगाः |
| 14 | ताजिकोक्त षोड्षयोगाः |
| 15 | विषकन्यायोगाः |
| 16 | रवियोगाः |
| 17 | जैमिनसूत्रे राजयोगाः |
| 18 | आयुदधियोगाः |
| 19 | सन्तानयोगाः |
| 20 | मृत्युकारकयोगाः[3] |

**1.राजयोगाः –**

श्रीवराहमिहिराचार्यानुसारेण बृहत्ज्जातकग्रन्थे एकादशाध्याये (राजयोगाध्याये) वर्णिताः भिन्न–भिन्न ग्रहस्थित्यानुसारेण 123 राजयोगाः सन्ति। तथा च

फलदीपिकायां मंत्रेश्वरेणकथिता 28 प्रकारकाः महायोगाः सन्ति।

श्रीपराशरानुसारेण बृहत्पाराशरहोराशास्त्रग्रन्थे कथिताः घटीलग्न–होरालग्न –जन्मलग्न –कारकांशलग्न तथा च षड्वर्गलग्नसन्दर्भे एवं ग्रहाणां (14.196 तथा च 34.33) स्थानभेदे –दृष्टिभेद –युतिभेदपूर्वके विविधराजयोगाः वर्णिताः सन्ति।

श्रीकालिदासेन –विविध विपरीतराजयोगाः तथा नीचभंगराजयोगाः फलदीपिकायाः वर्णिताः सन्ति।

सर्वार्थचिन्तमणिग्रन्थे मन्त्रेश्वरोनुसारेण विशिष्टनामाभिपूर्वकं विविधराज–योगाः सन्ति।

जातकपारिजातग्रन्थे 65 प्रकारकस्य राजयोगाः सन्ति।

सारावलीग्रन्थे 85 राजयोगाः वर्णिताः सन्ति। तथा च द्वै, त्रयः, चत्वारि, पच्च, षड्ग्रहयुतिः जनिताः राजयोगाः वर्णिताः सन्ति।

ग्रह भेषज जल मदन पट, पाइ कुयोग सुयोग।
होइहि कुवस्तु सुवस्तु जग, लखहिं सुलच्छन लोग।।[1]

## 2.नाभसयोगा : –

महर्षि पराशरोक्त बृहत्पाराशरहोराशास्त्रे 'नाभसयोगाध्यायनामके 36 अध्याये तथा आचार्य श्री वराहमिहिराचार्येण स्वकीये बृहज्जातकग्रन्थे द्वादशे अध्याये पूर्णतया नाभसयोगाः योगानां वर्णनं कृतमस्ति। यथा –

रज्जुश्च मुसलश्चैव नलश्चेत्याश्रयास्त्रयः।
मालाख्यः सर्वसंज्ञश्च दलयोगौ प्रकीर्तितौः।।[2]
गदाख्यःशकटाख्यश्च श्रृंगाटक–विहङ्गमौः।
हल–वज्र–यवाश्चैव कमलं वापियूपकौ।।[3]
शर–शक्ति–दण्ड–नौका–कूटच्छत्र–धनूंपिञ्च।
अर्धचन्द्रस्तु चक्रं च समुद्रश्चेति विंशति।।[4]

---

1. रामचरितमानस, कवि तुलसीदास,
   ज्योतिषयोग और उनका महत्व –नीरज पाण्डेय
2. बृहत्होराशास्त्र–अध्याय–36 / 3
3. बृहत्होराशास्त्र–अध्याय–36 / 4
4. बृहत्होराशास्त्र–अध्याय–36 / 5

संख्याख्या –वल्लकी–द्राम–पाश–केदार शूलकाः।
युगो गोलश्च सप्तैते युक्ता दन्तमिता द्विजः।।[1]

सूर्यादि सप्तग्रहाः मेषादिद्वादशराशयः तथा च देहादि द्वादशभावानां विभिन्नसंयोगेन विशालगगनमण्डले नाभसयोगाः समुत्पद्यन्ते।

मुख्यत्वे नाभसयोगानां चत्वारिभेदाः सन्ति। तद्यथा –

1. विंशति आकृतियोगाः
2. सप्तसंख्यायोगाः
3. द्विदलयोगाः
4. आश्रययोगाश्चेति।

सर्वाहत्य 32 प्रकारस्य मुख्यनाभसयोगाः भवन्ति। तत्र तु सूर्यादि सप्तग्रहभेदेपूर्वकं एककलग्नेषु 150 योगाः तथा च मेषादिद्वादशराशि लग्नभेदपूर्वकं 150 X 12 =1800नाभसयोगाः भवितुं शक्यन्ते।

कस्यापि जातकस्य विशिष्टगुणाः चारित्र्य, पकृति, जीवनशैलीविषयक ज्ञानं एतेभ्यः नाभसयोगेभ्यः प्राप्यते। तथा च तेषां आजीवनप्रभावो भवति। एते योगाः केवलं ग्रह –राशि –भावाधारिताः सन्ति। तेषां फलं आजीवनं प्राप्यते न तु काल, दशा आधारिता सन्ति। तेषां फलाफलं दशा उपरि निर्भरो नास्ति।

प्राचीनकाले तिस्र–चतुस्रनगर्याः स्वामी अपि राजा स्वरूपेण प्रसिद्धः भवति। किन्तु अघ्तनकाले तु राजयोगस्य फलस्वरूपञ्च भिन्नं –भिन्नं वर्तत। सर्वकारि प्रबंधने कोऽपि महत्वपूर्ण प्रदप्राप्तिः (कमिश्नर, क्लेक्टर, कैप्टन, मेजर, कर्नल, सरपंच, लोकसभा–राज्यसभा–विधानसभादि सभ्यपदं, मन्त्री, उपमन्त्री, प्रधानमन्त्री इत्यादि) राजयोग कारणेन एव भवति। तथा च अत्याधुनिक उपयागि उपकरणानि, बृहत्भूमिस्वामित्वं, सुखपूर्णजीवनयापनं, उच्चाभ्यासेनविशिष्ट पदप्राप्तिपूर्वकं धनार्जनं इत्यादि सर्वसौख्यं राजयोगफलस्येव प्राप्यन्ते।

---

1.बृहत्होराशास्त्र–अध्याय–36, श्लोक, 4 तः 6 पर्यन्तम्

**3.विष्कम्भादियोगाः –**

स्पष्टसूर्य चन्द्रयोः कलात्मक मानं भभोग तुल्य कलायाः प्राप्ता संख्यातुल्यः विष्कुम्भादि योगाः भवन्ति। तेषां शुभाशुभफलं नामानुसारेणैव प्राप्यते। मुर्हूतविषयक 27 योागाः भवन्ति। तत्र वैधृति व्यतीपात, शूल,गंड, इतयादि मुख्यतया अशुभफलप्रदाता ग्रहाः सन्ति। कार्यसिद्धयर्थे विष्कंभ, प्रतिरायुत्मान् सौभाग्य शोभनतथा –– फलम्। इति।

**4.आनन्दादियोगाः –**

श्रविवासरतः क्रमेण अश्विन नक्षत्रतः गणनापूर्वकं चक्रानुसारेण आनन्दादि 28 योगा5 भवन्ति। एतेषां योगानां फलमपि नाम्नानुसरेणैव भवन्ति। एषाः योगाः दिनशुद्धि मुर्हूतविषये अतीवमहत्वपूर्णाः सन्ति। तद्यथा–

| क्रम | योगानांनामानि | क्रम | योगानांनामानि |
|---|---|---|---|
| 1 | आन्नन्दः | 2 | कालदण्डः |
| 3 | धूम्रः | 4 | धाता |
| 5 | सौम्यः | 6 | ध्वाक्षः |
| 7 | केतुः | 8 | श्रीवत्सः |
| 9 | वज्रः | 10 | मुद्रगरः |
| 11 | छत्रः | 12 | मित्रम् |
| 13 | मानसः | 14 | पद्मः |
| 15 | लुम्बः | 16 | उत्पातः |
| 17 | मृत्युः | 18 | काणि |
| 19 | सिद्धिः | 20 | मुसलं |
| 21 | शुभः | 22 | गदः |
| 23 | मातृ | 24 | राक्षसः |
| 25 | चरः | 26 | सुस्थिरः |
| 27 | प्रवर्धमानः: | 28 | |

**मुहूर्तविषयकयोगाः –**

मनुष्यजीवने दिनप्रतिदिन करणीय कार्याणां सिद्धयर्थं षोडशसंस्कार– विध्यर्थे तथा च वास्तु यज्ञयागादि अर्थे नक्षत्र–तिथि–वार–सूर्य–चन्द्रयोः स्थित्याधारेण सिद्धयोगाः मृत्यु–काल–उत्पाद्य, त्रिपुष्कर, कपिलाषष्ठी, खर्पर, चामार्ध, परिधि, राजभंग, व्यतीपात रवियोगादि शुभाशुभयोगाः भवन्ति

**पञ्चमहापुरुषयोगाः –**

जातकस्य जन्मकुण्डल्यां यदि भौमादि पञ्चताराग्रहाः स्वोच्चराश्यां वा केन्द्रस्थाने स्थिताः सन्ति तदा क्रमेण रुचक,भद्र,हंस, मालव्य, तथा शशयोग नामकाः अतिशुभफलदायी योगः सञ्जायते। यथा –

रुचकभद्रहंसमालव्याः सशशका इति पञ्चकीर्तिताः।
स्वभवनोच्चगतेषु चतुष्टये क्षितिसुतादिषु क्रमशोः।।[1]

**सुनफा–अनफा–दुर्धरायोगाः – केमद्रुमयोगश्च।**

विधोस्तु सुनफानफाधुरुधराः स्वरिफोभयः।
स्थितैर्विरविभिः ग्रहैःरितिरथा तु केमद्रम्।।[2]

एषु योगेषु चन्द्रतः अन्यग्रहाणां उभयोः पाश्वर्योः स्थितिः महत्वपूर्णं वर्तते। यदि भौमादि पञ्चताराग्रहेभ्यः कोऽपि एकः वा अधिकः ग्रहाः चन्द्रतः द्वितीयेस्थाने जन्मकुण्डलयां अस्ति तर्हि चेत् सुनफायोगः भवेत्।

यदि ते चन्द्रतः द्वादशे भावे चेत् तर्हि अनफायुगः भवेत्।

यदि द्वयोः पाश्वर्योः ग्रहः चेत् तर्हि दुर्धरायोगः भवेत्।

यदि उपरोक्त कोऽपि योगः न स्यात् तर्हि केमद्रुमयोगः भवति।

---

1. फल. – 6/1
2. फल – 6/5

**वेशि–वेशि उभयचारीयोगः –**

सूर्याद्वययगैर्वाशिद्वितीयर्गैश्चन्द्रवर्जितै वेशि।
उभयपरिस्थितैर्ग्रहेन्द्रेरुभयचारी नामतः प्रोक्ता।।[1]

यदि जन्मकुण्डल्यां सूर्यतः द्वितीये स्थाने चन्द्रविहाय अन्य ग्रहः स्थितो चेत् तर्हि वेशियोगः भवति। द्वादशे ग्रहः स्थिते सति वाशियोगः तथा उभयस्थानयोः ग्रहे सति उभयाचारीयोगः सञ्जायते। वेशियोग अपेक्षया योगः अधिकशुभफलदायी अस्ति।

**सन्यासयोगाः – प्रवज्यायोगाः**

यथा भिन्न–भिन्न ग्रहसंयोगे राजयोगाः समुत्पद्यन्ते तथैव जन्मकुण्डलयां एकस्मिन् राश्यां चत्वारि, पञ्च, षट, सप्तग्रहाणां बलं भूत्वा युति भवेत् तर्हि जातकं संसारे विरक्तिपूर्वकं प्रवज्यायोगः सञ्जायते। यथा–

एकस्थैश्चतुरादिर्भिर्बलयुतैजात पृथऽवीथगैः।
शाक्यो जीविकभिक्षुवृद्धचरका निग्रन्थवन्याराज्ञा।
महेयज्ञगुरुक्षयाकरसितप्राभाकरीनैः क्रमात्।
प्रवज्या बलिभिः समाः पराजितैस्तस्वामिभः प्रच्युतिः।।[2]

तत्र प्रवज्याकारक बलिष्ठःग्रहानुसारेण जातकः सन्यासग्राह्यः। यािा बली भैमेन शाक्यः, बुधेन, जीविकः, गुरुणा, यतिः चन्द्रेण, श्राविकः, शुक्रेण, चरकः, शनिनाभक्षी तपस्वी सनयासी भवेत्।

**दैन्ययोगः –**

यथा शुभग्रहाणां युतिसिथति संयोगेन परिवर्तनं च राजयोगाः सञ्जायते तथैव दुःस्थानाधिपतिनां संयोगेन परिवर्तनसम्बन्धेन दैन्ययोगाः अपि जन्मकुण्डलयां समुत्पद्यने। एते योगाः जातकः आजीवन द्ररिद्रः भवेत्।

---

1. सारा. –14/1
2. बृहत्.– 15/1

यथा –

अन्योन्यं भवनस्थयोर्विहगयोलग्नादिरिःफान्तकं
भावधीश्वरयोः क्रमेण कथिताः षट्षष्टियोगाः जनैः।
त्रिंशदैन्यमुदीरितं व्ययरिपुच्छिद्रादिनाथोत्थिता
स्त्वटो शौर्ययतेः स्वत्नाः निगदिताः शेषा महाश्याः स्मृताः।[1]

जन्मकुण्डल्यां लग्नतः द्वादशभावपर्यन्तं द्वयोः द्वयोः भावेशयोः मध्ये व्यत्ययसम्बन्धेन सर्वाहत्य षटषष्ठीयोगाः स्युः। तत्र षष्ठेश–अष्टमेश एवं व्ययेश ग्रहेषु सहैव परिवर्तनेन अष्टयोगाः भवन्ति। तेषां संा खलयोगाः। शेषः शुभस्थानानधिपतयः परिवर्तनेन 28 योगाः सञ्जायते। तेषां संज्ञा महायोगाः कथ्यते।

अस्मिन् योगे जातः मनुष्यः मूर्खः, मूर्खः, अपवादकः पापकर्मा शत्रुपीडितः, क्रूरः, चञ्चलमतिः, कटुभाषी च भवेत्। तेषां सर्वकायेषु विघ्नं सृज्यते सः दरिद्रः भवेत्।

**विषकन्यायोगाः –**

श्रीगणेशविरचितजातकालंकारे चतुर्थेऽध्याये विषकन्या योगाः वर्णिताः सन्ति। अस्मिन् योगे जातः कन्या अनपत्यं दोषं वैध्यव्यदोषं च प्राप्यते।

भौजङ्गे कृत्तिकायां शतभिषजि तथा सूर्यमन्दारवारे
भद्रासंज्ञे तिथौ या किल जननमियात्सा कुमारी विषाख्या।
लग्नस्थौ सौम्यखेटौवशुभगगनश्चैक आस्ते तत्तो द्वौ
वैरिक्षेत्रानुयतौ यदि जनुषि तदा सा कुमारी विशाख्या।।[2]

---

1. फल. – 6/21
2. जतका . –4/1

# 4.योगानां ग्रहयुतिदृष्ट्या अन्यदृष्ट्या च अध्ययनम्

**स्थानसम्बन्धः –**

जन्मपत्रिकायां सूर्यादिग्रहाणां केन्द्रत्रिकोणादिस्थितिः अन्यग्रहस्य राश्यांस्थिति परिवर्तनानुसारेण यागः निर्मीयते। तत तु स्थानजनितयोगसम्बन्धः अन्योन्याश्रय समबन्धः अस्ति इति कथ्यते।

**दृष्टिसम्बन्धः –**

सूर्यादि सर्वे ग्रहाः स्वस्थानतः सप्तमेशपूर्णदृष्टि प्रभावः क्रियते। गुरु–शुक्र–शनि–भौम स्थानतः विशिष्टपूर्णदृष्टि क्रियन्ते। यथोक्तं लघुपाराशरी ग्रन्थे –

पश्यन्ति सप्तमं सर्वे शनिजीवकुजादयः।
विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान्।।[1]

**एकतः दृष्टिसम्बन्धः –**

अत्र विशेषतः शनिः स्थानात् तृतीये–दशमे भौमः, चतुर्थे–अष्टमे एवं बृहस्पतिः, पञ्चमे–नवमे स्थानेषु विशिष्टादृष्टिः क्रियते तेन कारणेन विशिष्टफलं समुत्पद्यते। सम्बन्धोऽयं एकदृष्टिसम्बन्धः। पाराशरमते एवं मतमस्ति।

**स्थितिएकत्रयुतिसम्बन्धः –**

विविधशास्त्रे सूर्यादीनां चरणपद्धतिः क्रमः वर्तते। तद्यथा –

त्रिदशानिकोण चतुस्रसप्तमान्य–
वलोकयन्ति चरणभिवृद्धितः।
रविरामरेज्यरुधिराः परे च ये
क्रमशो भवन्ति किलवीक्षणेऽधिकाः।। [2]

---

1. लघुपाराशरी – 1/5 **2.** बृहत्जातकम् – 2/13

## स्थितिएकत्र–युतिसम्बन्धः–

सूर्यादि ग्रहाणां एकराश्यां स्थितिः युति इति कथ्यते। शुभस्थाने स्वामीग्रहस्य अन्यशुभग्रह परत्वे शुभफलं ददाति। केन्द्रत्रिकोणानां स्वामीग्रहस्य अतीवयुति योगकारकौ भवति। यथा –

केन्द्रत्रिकोण पतयः सम्बन्धेन परस्परम्।

इतरैश्प्रसक्ताश्चेविशेष फलदायकाः।। [1]

ग्रहाणां उपर्युक्त सम्बन्धाधारेण विविधयोगाः उत्पद्यते। तत्रैव ग्रहाणां मेषादिद्वादश राशिस्थित्यानुसारेण भावस्थिति अनुसारेण षोडशवर्गानुसारेण एवं राशि–ग्रह–भावस्थित्यानुसारेण भिन्न–भिन्न योगाः उत्पद्यन्ते। तथा च नक्षत्र–वार संयोगेन मुर्हूत शास्त्रोकत योगाः समुत्पद्यन्ते।

## योगानां ग्रहयुतिदृष्ट्या स्वरूपाणि –

1. सूर्यादिग्रहजनित योगाः
2. ग्रहराशिजनितयोगाः
3. ग्रहभावजनितयोगाः
4. षोडशवर्गेग्रहस्थिति जनितयोगाः
5. राशि–ग्रह–भाव–जनितयोगाः
6. नक्षत्र–तिथि–वार–संयोगजनितयोगाः

# 5.विशिष्टयोगानामध्ययनम्

ज्योतिषशास्त्रेषु विविधविषयोपरि विविधप्रकारेण सुख–दुःखादि अनेके योगानां वर्णनं प्राप्तं भवति। तन्मध्ये केषांञित विशेषप्रकारकाणां योगानां तथा राजयोागनां एवं धन–धान्यादि विविध सुख–दुखादियोगानां उल्लेखः विविध ग्रन्थे मिलति। इदं विशेषयोगः कथं भवति ? केन कारणेन भवति ? इत्यादि चर्चा कृतं मया। विशेषयोगः विविधप्रकारेण भवति। यथा –

1. लग्नगतविशिष्टयोगः
2. ग्रहगतविशिष्टयोगः
3. राशिगतविशिष्टयोगः
4. भावगतविशिष्टयोगः

**1.लग्नगतविशिष्टयोगः ––**

लग्नवशात् विशिष्टायोगाः भवन्ति तान् लग्नगतविश्ष्टियोगः कथ्यते। कर्कः लग्नः स्यात् एवं लग्ने पूर्णचन्द्रः स्थितो स्यात् सप्तमभावे मकरस्थ बुधः स्यात्, षष्ठभावे धनुर्गतसूर्यः स्यात्, चतुर्थभावे तुलालग्नतः शुक्रः स्यात्, दशमभावे मेषगतगुरुः स्यात् एवं तृतीयभावे कन्यागत शनिः मंगल, स्यातां जातकः शाशनाधिकारी भवति। यथा –

स्वर्क्षे नक्षत्रनाथः स्फुटकरकरनिकरकराङ्ककृत प्राप्तलग्नो
धुनेसोमस्य पुत्रो यदि रिपुभवनं भास्करं सम्प्रयातः।
पाताले दासनेऽथो गुरुरपिगगने सौरभौमो तृतीये
स्द्भूपालो भवेद्यः शशिकरधवलं चामरं राजल्क्ष्मीम्।।[1]

---

1. सरावली– 35 / 10

यदि जन्मलग्ने लग्नस्थः चन्द्रः स्यात्, गुरुचतुर्थभावगत स्यात्, दशमभावे शुक्रः स्यात् शनिः स्वोच्चांशः अर्थात् तुलाराशिः गतः स्यात् वा स्वगृहे अर्थात् मकरकुम्भगतः स्यात् तदा जातकः राज्ञः तुल्यो भवति। यथा –

लग्ने शीतकरे गुरौ सुखगते कर्मस्थिते भार्गवे
तुङ्गस्वर्क्षहते दिवाकरसुते राजाऽवा तत्समः।
अन्त्योपान्त्यविलग्नवित्तसहजव्यपारगेहेषु
सौम्यव्योमचरेषु भूपतिसमो राजाधिराजप्रियः।।[1]

यदि लग्ने गुरुः केन्द्रे बुधः, भाग्येशेन दृष्टः तथा लग्नेशन दृष्टो भवेत्तदा जातकः नृपतुल्योः भवति। यथा –

लग्ने गुरौ बुधे केन्द्रे भाग्यनाथेन वीक्षिते।
लग्नेशे वापि संदृष्टे नृपतुल्यो भवेननरः।।[2]

यदि जन्मकाले लग्ने चन्द्रः, शुक्रः, तथा बुधः भवेत्तदा जातकः अनेकगुणेन सुखी भवति एवं यदि गुरोऽपि लग्ने भवतिचेत्तदा अधिकपुत्ररत्नेन शुभः तथा धनधान्य सर्वगुण सम्पन्नो भवति जातकः। यथा –

लग्ने चन्द्रज्ञशुक्रेषु बहुसौख्यगुणसमान्वितः।
जीवे तत्राति सम्पन्ना पुत्रवित्तसुखान्वितः।।[3]

---

1. सारावली – 35/13
2. सर्वार्थ. – 9/20
3. बृहत. –पृ.–131

**राशिगतविशिटयोगाः –**

राशिजनिता विशेषयोगाः ते राशिगतविशिटयोगः कथ्यते। अत्र राशिजनित केचन विशेषयोगानां नामानि अत्र उपस्थापिता –

1. गोलयोगः
2. युगयोगः
3. दामयोगः
4. शूलयोगः
5. केदारयोगः
6. पाशयोगः
7. वीणायोगः
8. रज्जुयोगः
9. मुसलयोगः
10. नलयोगः
11. चक्रयोगश्चेति।

यदि सर्वे ग्रहाः एकराशिस्थः भवेत् तदा गोलयोगः भवति।

यदि सर्वे ग्रहाः द्विराशिगतौ तदा युगयोगः भवति।

त्रयः राशिगतः स्यातां दा केदारनामको योगः भवति।

यदि सर्वे ग्रहाः पञ्चराशिसु गतः स्युः तदा पाशयोगः भवति।

यदि सर्वे ग्रहः षष्ठराशिुषु गतः स्युः तदा दामयोगः भवति।

यदि सर्वे ग्रहाः सप्तराशिषु मतः स्यु तदा वीणनामकः योगः भवति।यथा –

एकराशिस्थितैर्गोलो युगाख्यो द्विभसंस्थिते।
शूलस्तु त्रिभगैः प्रोभः केदारस्तुचतुर्भगैः।।
पञ्चराशिस्थितैः पाशो दामाख्यःषड्ग्रहाश्रितै।
वीणा सप्तभगे सर्वैर्विहायान्नुदीरितान्।।

---

1. बृहत् – 36 / 16–17

**3.ग्रहगतः विशिष्टयोगः –**

ग्रहजनित विविधयोगाः ये ये योगाः भवन्ति ते योगानां ग्रहगत विशिष्ट योगाः कथ्यन्ते। ते योगाः अधोलिखित सन्ति –

1. श्रृंगान्टकयोगः
2. हलयोगः
3. यवयोगः
4. कमलयोगः
5. वापीयोगः
6. चक्रवर्तीयोगः
7. महीपतियोगः
8. मालायोगः
9. नलयोगः
10. पर्वतयोगः
11. लक्ष्मीयोगः

यदि समस्तग्रहाः 1/5/9 भावे स्युः तदा श्रृगान्टकयोगो भवति। यथा –

होरास्तगतै शकटं चतुर्दशमाश्रितौर्भवेद्विहगः।
उदयान्यगैस्त्रिकोणे हल इति श्रृङ्गान्टकं सलग्ने तत्।।[1]

**लक्ष्मीयोगः –**

केन्द्रे मूलत्रिकोणस्थे भाग्येशे वा स्वभोच्चगे।
लग्नाधिपे बलाढ्ये च लक्ष्मीयोगः प्रकीर्त्यते।।[2]

---

1. सारावली –21/14
2. बृहत् –37/27

**4.भावगतजनितयोगः –**

जन्मकुण्डल्यां लग्नात् प्रारभ्य द्वादशः भावः सन्ति। अर्थात् लग्न वा प्रथम भावातः आरभ्य द्वादशभाव पर्यन्तं भावस्यनामानि ईदृशी भवति। यथा –

| क्रम | भावस्थानानि | भावनामानि |
|---|---|---|
| 1 | प्रथमभावः | तनुः |
| 2 | द्वितीयभावः | धनम् |
| 3 | तृतीयभावः | सहोदरम् |
| 4 | चतुर्थभावः | मित्रः |
| 5 | पञ्चमभावः | पुत्रः |
| 6 | षष्ठभावः | रोगः |
| 7 | सप्तमभावः | पत्नी |
| 8 | अष्टमभावः | मृत्युः |
| 9 | नवमभावः | भाग्य |
| 10 | दशमभावः | कर्म |
| 11 | एकादशभावः | आयः |
| 12 | द्वादशभावः | व्ययः |

विविधभावेषु काश्चन् केन्द्र (1/4/7/12) कश्चन् आपेक्लिम् (3/6/9/12) काश्चन् पणफरः ( 2/5/8/11) काश्चन् त्रिषडाय (3/6/11) काश्चन् उपचयः (3/6/10/11) इत्यादयाः।